This Question Paper consists 35 questions and 4 printed pages.
अस्मिन् प्रश्नपत्रे 35 प्रश्नाः सन्ति। 4 मुद्रितपुटानि च सन्ति ।

Sl. No.

Roll No.
अनुक्रमाङ्क

| | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|
| | | | | | | | | | | | |

Code No. 60/SS/A
गुढसंख्या

Set /स्तबकः A

# SANSKRIT SAHITYA
# संस्कृतसाहित्यम्
# (348)

Day and Date of Examination
(परीक्षादिनं दिनाङ्कश्च) ____________________

Signature of Invigilators
(निरीक्षकयोः हस्ताक्षरम्)
1. ____________________
2. ____________________

**सामान्य निर्देशा :**

1. अनुक्रमाङ्कः प्रश्नपत्रस्य प्रथमपुटे नूनं लेख्यः।
2. निरीक्ष्यताम् यत् प्रश्नपत्रस्य पुटसंख्या प्रश्नानां च संख्या प्रथमपुटस्य प्रारम्भे प्रदत्तसंख्या समाना न वा। प्रश्नक्रमः सम्यग् न वा।
3. वस्तुनिष्ठप्रश्ननाम् (क), (ख), (ग), (घ) एषु विकल्पेषु युक्तम् उत्तरं चित्वा उत्तरपत्रे लेख्यम्।
4. समेषां प्रश्नानाम् उत्तराणि निर्धारितसमये एव लेख्यानि।
5. उत्तरपत्रे आत्मपरिचयात्मकं लेखनम् अथवा निर्दिष्टस्थानं विहाय अन्यत्र क्वापि अनुक्रमाङ्कलेखनं सर्वथा वर्जितमस्ति।
6. स्वस्य उत्तरपत्रे प्रश्नपत्रस्य गुढसंख्या 60/SS/A - A नूनं लेख्या।
7. समेषां प्रश्नानाम् उत्तराणि संस्कृतभाषया एव लेख्यानि।

# SANSKRIT SAHITYA

# संस्कृतसाहित्यम्

# (348)

परीक्षासमयावधिः (Time) होरात्रयम् (3 Hrs.)] [पूर्णाङ्काः : (Full Marks) : 100

---

**निर्देशाः** (i) अस्मिन् प्रश्नपत्रे **[A]** भागे **10, [B]** भागे **10, [C]** भागे **10, [D] 5** इति आहत्य **35** प्रश्नाः सन्ति ।

(ii) प्रश्नस्य दक्षिणे पार्श्वे संख्यासु (प्रश्नाः × अङ्काः = पूर्णाङ्काः) इति एवम् अङ्कान् निर्दिशति ।

(iii) समे प्रश्नाः अनिवार्याः ।

---

**[A]** दशानां युक्तं विकल्पं चिनुत । **[10 × 1 = 10]**

**1.** शिशुपालवधमहाकाव्यं कस्य कृतिः।

(क) माघस्य (ख) कल्हणस्य

(ग) श्रीहर्षस्य (घ) भट्टिस्वामिनः।

**2.** कः अनन्यशासनाम् ऊर्वीं शशास।

(क) मनुः (ख) सूर्यः

(ग) दिलीपः (घ) अजः।

**3.** द्वादशपञ्जरिकास्तोत्रानुसारं सन्निहिते मरणे किं न रक्षति।

(क) गोविन्दः (ख) धनम्

(ग) डुकृञ् करणे (घ) पुत्रः।

**4.** अरुण एष प्रकाशः इति कस्मिन् काव्ये अस्ति।

(क) शिवराजविजयः (ख) किरातार्जुनीयम्

(ग) मेघदूतम् (घ) अभिज्ञानशाकुन्तलम्।

**5.** कस्य आश्रमाद् मुनिः अष्टावक्र आगतः।

(क) विश्वामित्रस्य (ख) वशिष्ठस्य

(ग) वामदेवस्य (घ) ऋष्यशृङ्गस्य।

**6.** शुकनासोपदेशे तारापीडस्य पुत्रः कः आसीत्।

(क) शुकनासः (ख) चन्द्रापीडः

(ग) शूद्रकः (घ) वैशम्पायनः।

7. धारानगरस्य शासकः कः।

(क) भोजराजः (ख) राजशेखरः

(ग) अभिनवगुप्तः (घ) अनन्तवर्मा।

8. दरिद्रचारुदत्ते चारुदत्तस्य वसन्तसेनया सह प्रेमविनिमयः कस्मिन् नगरे अभवत्।

(क) उज्जयिन्याम् (ख) अयोध्यायाम्

(ग) भोजप्रदेशे (घ) मगधे।

9. योगिराजः प्रथमवारं कदा समाधिं गतः।

(क) विक्रमादित्यस्य काले (ख) महामदस्य काले

(ग) युधिष्ठिरकाले (घ) रामचन्द्रस्य काले।

10. शृङ्गवेरपुरे इङ्गुदीपादपस्य समीपे केन सह रामस्य साक्षात्कारः सम्पन्नः।

(क) निषादराजेन (ख) हनुमता

(ग) बालिना (घ) रावणेन।

[B] दशानां यथानिर्देशम् उत्तराणि लिखत। [10 × 2 = 20]

11. माघविरचितं महाकाव्यं किम्। तत्र कति सर्गाः सन्ति। [1 + 1 = 2]

12. कः महीक्षितामाद्यः आसीत्। तदन्वये कस्य जन्म अभवत्। [1 + 1 = 2]

13. रीतिसम्प्रदायस्य प्रवर्तक आचार्यः कः। तद्विरचितः ग्रन्थः कः। [1 + 1 = 2]

14. राजतरङ्गिणीग्रन्थे कि वर्णितम्। कस्य राज्ञ इतिहासात् राजतरङ्गिणीग्रन्थस्य आरम्भः। [1 + 1 = 2]

15. शिवपार्वत्योः प्रेम आश्रित्य कि महाकाव्यम् अस्ति। तस्य कति च सर्गाः। [1 + 1 = 2]

16. सोमतीर्थं को धूलीचकार। स कतिवारं भ्भारतवर्षे आक्रमणम् अकरोत्। [1 + 1 = 2]

17. कं ग्रन्थम् आधारीकृत्य कुवलयानन्दः विरचितः। तस्य लेखकस्य नाम किम्। [1 + 1 = 2]

18. गङ्गायां घोषः इति कस्या लक्षणाया उदाहरणम्। सादृश्यवशात् का लक्षणा भवति। [1 + 1 = 2]

19. रससूत्रं समाश्रित्य कति वादाः सन्ति। के च ते। [1 + 1 = 2]

20. कथम् अन्यस्य उपरि मनुष्येण कोपः न करणीयः। सर्वत्र कस्य उत्सर्जनं कार्यम्। [1 + 1 = 2]

**[C]** दश अनतिदीर्घोत्तरैः समाधत्त। **[10 × 4 = 40]**

21. योगिराजस्वरूपं शिवराजविजयानुसारेण प्रतिपादयत।

22. उत्तररामचरितानुसारेण विन्ध्यारण्ये तपोवनानि वर्णयत।

23. अभिनवगुप्तपादानाम् आनन्दवर्धनाचार्यस्य वा देशकालकृतीः अवलम्ब्य एकं प्रबन्धं लिखत।

24. ''तस्य दाक्षिण्यरूढेन'' इति ''दुदोह गां स यज्ञाय'' इति वा प्रतीकोद्धृतं श्लोकं प्रपूर्य व्याख्यात।

25. स्तोत्रानुसारेण धनागमतृष्णात्यागं समर्थयत सम्बन्धस्य क्षणिकत्वं च प्रतिपादयत।

26. ''लौकिकानां हि साधूनाम्'' इति ''स्नेहात्सभाजयितुमेत्य'' इति वा प्रतीकोद्धृतं श्लोकं सम्पूर्य व्याख्यात।

27. परस्परविरुद्धं राजलक्ष्म्याः चरितं ग्रन्थदिशा वर्णयत।

28. तोटकं रथोद्धता इत्यनयोः एकस्य च्छन्दसः लक्षणम् उक्त्वा उदाहरणे लक्षणसमन्वयः कार्यः।

29. तात्पर्यवृत्तिं यथाग्रन्थं वर्णयत।

30. राजतन्त्रे राजकुमारेण चन्द्रापीडेन कथम् आचरणीयम् इति वर्णयत।

**[D]** पञ्च दीर्घोत्तरैः समाधेयाः। **[5 × 6 = 30]**

31. चित्रदर्शने रामसीतयोः विवाहप्रसङ्गः यथाग्रन्थं वर्णयत।

32. रघुवंशीयानां नृपतीनां गुणान् स्वभाषया वर्णयत।

33. दुराचारया लक्ष्म्या गृहीतानां राज्ञाम् अभिषेककाले का दशा भवति।

34. वृत्तपद्यस्य स्वरूपं भेदान च सोदाहरणं स्वभाषया वर्णयत।

35. रूपकं वक्रोक्तिः इत्यनयोः एकम् अलङ्कारं सोदाहरणं प्रतिपादयत।

♦ ♦ ♦